श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षोडशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षोडशः सर्गः ॥

## नन्दीश्वरस्य रावणं प्रति शापः, भगवता शङ्करेण रावणस्य मानभङ्गस्ततस्तस्य खड्गप्राप्तिश्च

स जित्वा धनदं राम भ्रातरं राक्षसाधिपः।
महासेनप्रसूतिं तद् ययौ शरवणं महत्॥ **7.16.1** ॥

अथापश्यद् दशग्रीवो रौक्मं शरवणं महत्।
गभस्तिजालसंवीतं द्वितीयमिव भास्करम्॥ **7.16.2** ॥

स पर्वतं समारुह्य कञ्चिद् रम्यवनान्तरम्।
प्रेक्षते पुष्पकं तत्र राम विष्टम्भितं तदा॥ **7.16.3** ॥

विष्टब्धं किमिदं कस्मान्नागमत् कामगं कृतम्।
अचिन्तयद् राक्षसेन्द्रः सचिवैस्तैः समावृतः॥ **7.16.4** ॥

किन्निमित्तमिच्छया मे नेदं गच्छति पुष्पकम्।
पर्वतस्योपरिष्ठस्य कर्मेदं कस्यचिद् भवेत्॥ **7.16.5** ॥

ततोऽब्रवीत् तदा राम मारीचो बुद्धिकोविदः।
नेदं निष्कारणं राजन् पुष्पकं यन्न गच्छति॥ **7.16.6** ॥

अथवा पुष्पकमिदं धनदान्नान्यवाहनम्।
अतो निस्पन्दमभवद् धनाध्यक्षविनाकृतम्॥ **7.16.7** ॥

इति वाक्यान्तरे तस्य करालः कृष्णपिङ्गलः।
वामनो विकटो मुण्डी नन्दी ह्रस्वभुजो बली॥ **7.16.8** ॥

ततः पार्श्वमुपागम्य भवस्यानुचरोऽब्रवीत्।
नन्दीश्वरो वचश्चेदं राक्षसेन्द्रमशङ्कितः॥ **7.16.9** ॥

निवर्तस्व दशग्रीव शैले क्रीडति शङ्करः।
सुपर्णनागयक्षाणां देवगन्धर्वरक्षसाम्॥ **7.16.10** ॥

सर्वेषामेव भूतानामगम्यः पर्वतः कृतः।
इति नन्दिवचः श्रुत्वा क्रोधात् कम्पितकुण्डलः॥ **7.16.11** ॥

रोषात् तु ताम्रनयनः पुष्पकादवरुह्य सः।
कोऽयं शङ्कर इत्युक्त्वा शैलमूलमुपागतः॥ **7.16.12** ॥

सोऽपश्यन्नन्दिनं तत्र देवस्यादूरतः स्थितम्।
दीप्तं शूलमवष्टभ्य द्वितीयमिव शङ्करम्॥ **7.16.13** ॥

तं दृष्ट्वा वानरमुखमवज्ञाय स राक्षसः।
प्रहासं मुमुचे तत्र सतोय इव तोयदः॥ **7.16.14** ॥

तं क्रुद्धो भगवान् नन्दी शङ्करस्यापरा तनुः।
अब्रवीत् तत्र तद् रक्षो दशाननमुपस्थितम्॥ **7.16.15** ॥

यस्माद् वानररूपं मामवज्ञाय दशानन।
अशनीपातसङ्काशमपहासं प्रमुक्तवान्॥ **7.16.16** ॥

तस्मान्मद्वीर्यसंयुक्ता मद्रूपसमतेजसः।
उत्पत्स्यन्ति वधार्थं हि कुलस्य तव वानराः॥ **7.16.17** ॥

नखदंष्ट्रायुधाः क्रूरा मनःसम्पातरंहसः।
युद्धोन्मत्ता बलोद्रिक्ताः शैला इव विसर्पिणः॥ **7.16.18** ॥

ते तव प्रबलं दर्पमुत्सेधं च पृथग्विधम्।
व्यपनेष्यन्ति सम्भूय सहामात्यसुतस्य च॥ **7.16.19** ॥

किं त्विदानीं मया शक्यं हन्तुं त्वां हे निशाचर।
न हन्तव्यो हतस्त्वं हि पूर्वमेव स्वकर्मभिः॥ **7.16.20** ॥

इत्युदीरितवाक्ये तु देवे तस्मिन् महात्मनि।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता॥ **7.16.21** ॥

अचिन्तयित्वा स तदा नन्दिवाक्यं महाबलः।
पर्वतं तु समासाद्य वाक्यमाह दशाननः॥ **7.16.22** ॥

पुष्पकस्य गतिश्छिन्ना यत्कृते मम गच्छतः।
तमिमं शैलमुन्मूलं करोमि तव गोपते॥ **7.16.23** ॥

केन प्रभावेण भवो नित्यं क्रीडति राजवत्।
विज्ञातव्यं न जानीते भयस्थानमुपस्थितम्॥ **7.16.24** ॥

एवमुक्त्वा ततो राम भुजान् विक्षिप्य पर्वते।
तोलयामास तं शीघ्रं स शैलः समकम्पत॥ **7.16.25** ॥

चालनात् पर्वतस्यैव गणा देवस्य कम्पिताः।
चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम्॥ **7.16.26** ॥

ततो राम महादेवो देवानां प्रवरो हरः।
पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया॥ **7.16.27** ॥

पीडितास्तु ततस्तस्य शैलस्तम्भोपमा भुजाः।
विस्मिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः॥ **7.16.28** ॥

रक्षसा तेन रोषाच्च भुजानां पीडनात् तथा।
मुक्तो विरावः सहसा त्रैलोक्यं येन कम्पितम्॥ **7.16.29** ॥

मेनिरे वज्रनिष्पेषं तस्यामात्या युगक्षये।
तदा वर्त्मसु चलिता देवा इन्द्रपुरोगमाः॥ **7.16.30** ॥

समुद्राश्चापि सङ्क्षुब्धाश्चलिताश्चापि पर्वताः।
यक्षा विद्याधराः सिद्धाः किमेतदिति चाब्रुवन्॥ **7.16.31** ॥

तोषयस्व महादेवं नीलकण्ठमुमापतिम्।
तमृते शरणं नान्यं पश्यामोऽत्र दशानन॥ **7.16.32** ॥

स्तुतिभिः प्रणतो भूत्वा तमेव शरणं व्रज।
कृपालुः शङ्करस्तुष्टः प्रसादं ते विधास्यति॥ **7.16.33** ॥

एवमुक्तस्तदामात्यैस्तुष्टाव वृषभध्वजम्।
सामभिर्विविधैः स्तोत्रैः प्रणम्य स दशाननः।
संवत्सरसहस्रं तु रुदतो रक्षसो गतम्॥ **7.16.34** ॥

ततः प्रीतो महादेवः शैलाग्रे विष्ठितः प्रभुः।
मुक्त्वा चास्य भुजान् राम प्राह वाक्यं दशाननम्॥ **7.16.35** ॥

प्रीतोऽस्मि तव वीरस्य शौटीर्याच्च दशानन।
शैलाक्रान्तेन यो मुक्तस्त्वया रावः सुदारुणः॥ **7.16.36** ॥

यस्माल्लोकत्रयं चैतद् रावितं भयमागतम्।
तस्मात् त्वं रावणो नाम नाम्ना राजन् भविष्यसि॥ **7.16.37** ॥

देवता मानुषा यक्षा ये चान्ये जगतीतले।
एवं त्वामभिधास्यन्ति रावणं लोकरावणम्॥ **7.16.38** ॥

गच्छ पौलस्त्य विस्रब्धं पथा येन त्वमिच्छसि।
मया चैवाभ्यनुज्ञातो राक्षसाधिप गम्यताम्॥ **7.16.39** ॥

एवमुक्तस्तु लङ्केशः शम्भुना स्वयमब्रवीत्।
प्रीतो यदि महादेव वरं मे देहि याचतः॥ **7.16.40**॥

अवध्यत्वं मया प्राप्तं देवगन्धर्वदानवैः।
राक्षसैर्गुह्यकैर्नागैर्ये चान्ये बलवत्तराः॥ **7.16.41**॥

मानुषान् न गणे देव स्वल्पास्ते मम सम्मताः।
दीर्घमायुश्च मे प्राप्तं ब्रह्मणस्त्रिपुरान्तक॥ **7.16.42**॥

वाञ्छितं चायुषः शेषं शस्त्रं त्वं च प्रयच्छ मे।
एवमुक्तस्ततस्तेन रावणेन स शङ्करः॥ **7.16.43**॥

ददौ खड्गं महादीप्तं चन्द्रहासमिति श्रुतम्।
आयुषश्चावशेषं च ददौ भूतपतिस्तदा॥ **7.16.44**॥

दत्त्वोवाच ततः शम्भुर्नावज्ञेयमिदं त्वया।
अवज्ञातं यदि हि ते मामेवैष्यत्यसंशयः॥ **7.16.45**॥

एवं महेश्वरेणैव कृतनामा स रावणः।
अभिवाद्य महादेवमारुरोहाथ पुष्पकम्॥ **7.16.46**॥

ततो महीतलं राम पर्यक्रामत रावणः।
क्षत्रियान् सुमहावीर्यान् बाधमानस्ततस्ततः॥ **7.16.47**॥

केचित् तेजस्विनः शूराः क्षत्रिया युद्धदुर्मदाः।
तच्छासनमकुर्वन्तो विनेशुः सपरिच्छदाः॥ **7.16.48**॥

अपरे दुर्जयं रक्षो जानन्तः प्राज्ञसम्मताः।
जिताः स्म इत्यभाषन्त राक्षसं बलदर्पितम्॥ **7.16.49**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षोडशः सर्गः॥